**SA1 : CLASS-VII** 9/2013

**विषय : संस्कृतम्**

**अवधिः - होरात्रयम्** **पूर्णाङ्काः - 80**

***निर्देशाः -***

*(1) अस्मिन् प्रश्नपत्रे चत्वारः खण्डाः सन्ति।*

*(2) प्रतिखण्ड-उत्तराणि पृथक् प्रदत्तायाम् उत्तरपुस्तिकायां लेखनीयानि।*

*(3) प्रत्येकं खण्डम् अधिकृत्य उत्तराणि एकस्मिन् स्थाने क्रमेण लेखनीयानि।*

*(4) प्रश्नपत्रे उत्तराणि न लेखनीयानि।*

*(5) प्रश्नसंख्या प्रश्नपत्रानुसारं अवश्यमेव लेखनीया।*

*(6) सर्वेषां प्रश्नानां उत्तराणि संस्कृतेन लेखनीयानि।*

**खण्डः - 'क' (अपठित-अवबोधनम्)** **अङ्काः 10**

प्र1. अधोलिखितम् अनुच्छेदं पठित्वा प्रदत्तप्रश्नानाम् उत्तराणि लिखत -

प्राचीनकालात् एव भारतवर्षे आचार्याणाम् अत्यन्तं महत्वम् अस्ति। प्राचीनकाले तु आचार्यः परब्रह्म भवति स्म। आचार्यः एव छात्रान् सदाचारम् शिक्षयति। सः छात्रान् सन्मार्गम् दर्शयति। सः यत् किम् अपि करोति छात्राणाम् हिताय एव करोति। सः विद्यादानम् करोति। कठिनतमम् अपि विषयं सः उदाहरणैः सह सरलीकृत्य उपस्थापयति। आचार्यस्य मनः कमलम् इव कोमलं निर्मलं च भवति। अतएव सर्वे एव शिष्याः अपि तस्मै समानाः भवन्ति। आचार्यः सदैव स्वशिष्याणाम् हिताय ज्ञानवर्धनाय च चिन्तयति। आचार्यः स्वछात्रेषु पुत्रवत् स्निह्यति अतएव तयोः पिता-पुत्र-सम्बन्धः भवति। यदि शिष्याः अपि ज्ञानार्जनाय तेषाम् अनुशासने एव कार्यम् कुर्वन्ति तदा एव ते सुयोग्याः नागरिकाः पण्डिताः च भवन्ति।

*प्रश्नाः*

I. एकपदेन उत्तरत - (½x4=2)

(i) परब्रह्म कः भवति स्म?

(ii) सः छात्रान् किम् दर्शयति?

(iii) आचार्यः छात्रान् किम् शिक्षयति?

(iv) के सुयोग्याः नागरिकाः पण्डिताः च भवन्ति?

II. पूर्णवाक्येन उत्तरत - (2x2=4)

(i) आचार्यस्य मनः कीदृशम् भवति?

(ii) आचार्यः सदैव किम् चिन्तयति?

III. यथानिर्देशं उत्तरत - (½x4=2)

(i) 'आधुनिककालात्' अस्य पदस्य किम् विलोमपदम् अत्र प्रयुक्तम्?

(ii) 'करोति' क्रियापदस्य कर्तृपदं किम् अस्ति?

(iii) 'सुयोग्याः नागरिकाः' अनयोः पदयोः विशेषणपदं किम् अस्ति?

(iv) अस्मिन् गद्यांशे 'सः' सर्वनामपदं कस्मै प्रयुक्तम्?

IV. अस्य गद्यांशस्य कृते समुचितं शीर्षकं लिखत। (2)

## खण्डः - 'ख' (रचनात्मकं कार्यम्) अङ्काः 15

प्र1. स्वनगरस्य वर्णनं कुर्वन् मित्रम् प्रति पत्रं मञ्जूषायां दत्तैः उचितपदैः पूरयित्वा पुनः लिखत - (½x10=5)

| मञ्जूषा |
|---|
| मार्गम्, सुव्यवस्थितं, उद्यानेषु, पठितुम्, तव, आकाश, लेखिष्यामि, शिक्षासंस्थाः, गौतमबुद्धनगरम्, परीक्षाभवनात् |

(1)__________

दिनांङ्कः __________

प्रिय (2)__________ ।

सप्रेम नमः।

अत्र कुशलं तत्रास्तु। अस्मिन् पत्रे अहं गौतम-बुद्धनगरस्य वर्णनं करोमि। (3)__________ अतीव सुन्दरं नगरम् अस्ति। इदं नगरं दिल्लीनगरस्य समीपम् अस्ति। इदं नगरं सुनियोजितम् (4)__________ च अस्ति। (5)__________ उभयतः हरिताः वृक्षाः सन्ति। अत्र मार्गेषु (6)__________ गृहेषु च अधिकाधिकं वृक्षाः सन्ति। इदं नगरं औद्योगिकक्षेत्रस्य रूपे प्रसिद्धम् अस्ति। अत्र अनेकाः (7)__________ अपि सन्ति। प्रतिवर्षं सहस्रं विद्यार्थिनः अत्र (8)__________ आगच्छन्ति। अधिकं न वर्णयामि। विस्तरेण पुनः (9)__________ । पितृभ्याम् नमः।

(10)____________ प्रियं मित्रं

आशीषः

प्र2. अधः प्रदत्तं चित्रम् आधृत्य मञ्जूषायां प्रदत्तशब्दानां सहायतया पञ्चसंस्कृतवाक्यानि लिखत - (2x5=5)

| मञ्जूषा |
|---|
| नदीतटस्य, पुष्पाणि, जलम्, सूर्यः, पर्णकुटीरं, वृक्षाः, ददाति, आकाशे, दीव्यति, विकसन्ति |



## खण्डः - 'ग' (अनुप्रयुक्त-व्याकरणम्) अङ्काः 25

प्र1. अधोलिखितवाक्येषु रेखांकितपदेषु सन्धिं सन्धिच्छेदं वा कृत्वा पुनः पूर्णवाक्यं लिखत - (1x5=5)

(i) हिमालयः पर्वतराजः अस्ति।

(ii) रमेशः मम मित्रम् अस्ति।

(iii) शीघ्रं उत्तिष्ठ, भानु + उदयः भवति।

(iv) महा + ऋषिः उटजे वसति।

(v) रवीन्द्रः अद्य विद्यालयं न आगच्छत्।

प्र2. मञ्जूषायां दत्तैः अव्ययपदैः वाक्यपूर्तिम् कुरुत - (1x5=5)

| मञ्जूषा |
|---|
| अहर्निशम्, सहसा, उच्चैः, परश्वः, तूष्णीम् |

(i) ह्यः ________ मम गृहे रामः आगच्छत्।

(ii) निरीक्षकः ________ विद्यालयम् आगमिष्यति।

(iii) परीक्षायाः दिवसेषु अहं ________ पठामि।

(iv) कक्षायां ________ मा वद।

(v) सभायां सर्वे जनाः ________ आसन्।

प्र3. उचितशब्दरूपैः वाक्यानि पूरयित्वा वाक्यानि पुनः लिखत - (1x5=5)

(i) एते ________ गंगा यमुना च स्तः। (नदी)

(ii) सा ________ बालिकया सह उद्यानं गच्छति। (तद् - स्त्री)

(iii) ________ मक्षिका अस्ति। (मधु - सप्तमी विभक्तिः, एकवचनम्)

(iv) अहं ________ जलम् आनयामि। (कवि - चतुर्थी विभक्तिः)

(v) हे ________! अहं त्वां नमामि। (कवि)

प्र4. उचितधातुरूपैः वाक्यानि पूरयित्वा वाक्यानि पुनः लिखत - (1x5=5)

(i) वृक्षे अनेकानि फलानि ________। (अस्)

(ii) माता अवदत् - ह्यः अहं भोजनं न ________। (पच्)

(iii) पशवः क्षेत्रे तृणानि ________। (चर्)

(iv) वयं श्वः भोजनं न ________। (पच्)

(v) युवाम् कवितां ________। (लिख्)

प्र5. निम्नवाक्यानि शुद्धं कृत्वा पुनः लिखत - (1x5=5)

(i) यानम् राजमार्गे चलन्ति।

(ii) सुन्दरं खगः वृक्षे तिष्ठति।

(iii) वयम् विद्यालये पठावः।

(iv) श्वः अहं विद्यालयं न गच्छामि।

(v) बुद्धिहीनः नराः विनश्यन्ति।

## खण्डः - 'घ' (पठित-अवबोधनम्) अङ्काः 30

प्र1. अधोलिखितं गद्यांशं पठित्वा प्रदत्तप्रश्नानां उत्तराणि लिखत - (5)

कृष्णमूर्तिः अवदत् - "मित्र! ममापि अष्टौ कर्मकराः सन्ति। ते च द्वौ पादौ, द्वौ हस्तौ, द्वे नेत्रे, द्वे श्रोत्रे इति। एते प्रतिक्षणं मम सहायकाः। किन्तु तव भृत्याः सदैव सर्वत्र च उपस्थिताः भवितुं न शक्नुवन्ति। त्वं तु स्वकार्याय भृत्याधीनः। यदा यदा ते अनुपस्थिताः तदा तदा त्वं कष्टम् अनुभवसि।

*प्रश्नाः*

I. एकपदेन उत्तरत - (½x2=1)

(i) के सदैव सर्वत्र च उपस्थिताः भवितुं न शक्नुवन्ति?

(ii) कृष्णमूर्तेः कति कर्मकराः सन्ति?

II. पूर्णवाक्येन उत्तरत - (1x2=2)

(i) श्रीकण्ठः स्वकार्याय केषाम् अधीनः?

(ii) कृष्णमूर्तेः के के कर्मकराः सन्ति?

III. यथानिर्देशं उत्तरत - (½x4=2)

(i) 'अनुभवसि' क्रियापदस्य कर्तृपदम् किम् अस्ति?

(ii) 'कर्णे' अस्य किम् पर्यायपदम् अत्र प्रयुक्तम्?

(iii) अस्मिन् गद्यांशे 'त्वम्' सर्वनामपदं कस्मै प्रयुक्तम्?

(iv) 'मम' अस्य किम् विलोमपदम् अत्र प्रयुक्तम्?

प्र2. अधोलिखितं पद्यांशं पठित्वा प्रदत्तप्रश्नानाम् उत्तराणि लिखत - (5)

पृथिव्यां त्रीणि रत्नानि जलमन्नं सुभाषितम्।
मूढैः पाषाणखण्डेषु रत्नसंज्ञा विधीयते ॥

*प्रश्नाः*

I. एकपदेन उत्तरत - (½x2=1)

(i) कैः पाषाणखण्डेषु रत्नसंज्ञा विधीयते?

(ii) पृथिव्यां कति रत्नानि सन्ति?

II. पूर्णवाक्येन उत्तरत - (2x1=2)

पृथिव्यां कानि रत्नानि सन्ति?

III. यथानिर्देशं उत्तरत - (1x2=2)

(i) 'विद्वद्भिः' अस्य पदस्य किम् विलोमपदम् अत्र प्रयुक्तम्?

(ii) 'वसुन्धरायां' अस्य किं पर्यायपदम् अत्र प्रयुक्तम्?

प्र3. अधोलिखितं संवादं पठित्वा प्रदत्तप्रश्नानां उत्तराणि लिखत - (5)

सञ्चालकः - अलं कोलाहलेन। अद्य परं हर्षस्य अवसरः यत् अस्मिन् कविसम्मेलने काव्यहन्तारः कालयापकाश्च भारतस्य हास्यकविधुरन्धराः समागताः सन्ति। एहि, करतलध्वनिना वयम् एतेषां स्वागतं कुर्मः।

गजाधरः - सर्वेभ्योऽरसिकेभ्यो नमो नमः। प्रथमं तावद् अहम् आधुनिकं वैद्यम् उद्दिश्य स्वकीयं काव्यं श्रावयामि।

*प्रश्नाः*

I. एकपदेन उत्तरत - (½x2=1)

(i) केभ्यः नमो नमः?

(ii) केन अलम्?

II. पूर्णवाक्येन उत्तरत - (1x2=2)

(i) गजाधरः कं उद्दिश्य स्वकीयं काव्यं श्रावयति।

(ii) कविसम्मेलने के के समागताः सन्ति?

III. यथानिर्देशं उत्तरत - (½x4=2)

(i) 'कविसम्मेलने' अस्य विशेष्यपदस्य विशेषणपदम् किम्?

(ii) 'चिकित्सकं' पदस्य किं पर्यायपदम् अत्र प्रयुक्तम्?

(iii) 'कुर्मः' क्रियापदस्य कर्तृपदम् किम्?

(iv) 'परकीयं' पदस्य किं विलोमपदम् अत्र प्रयुक्तम्?

प्र4. अधोलिखितश्लोकस्य अन्वयं उचितपदक्रमेण पूरयित्वा उत्तरपुस्तिकायां पुनः लिखत - (1x4=4)

क्षमावशीकृतिर्लोके क्षमया किं न साध्यते।
शान्तिखड्गः करे यस्य किं करिष्यति दुर्जनः॥

अन्वयः - लोके क्षमावशीकृतिः (1)__________ किं न (2)__________। यस्य (3)__________ शान्तिखड्गः (4)__________ (तस्य) किं करिष्यति।

प्र5. अधोलिखितवाक्येषु रेखांकितपदानि आधृत्य प्रश्ननिमार्णं कुरुत - (4x1=4)

(i) <u>शून्यस्य</u> प्रतिपादनं सर्वप्रथमम् आर्यभटः अकरोत्।

(ii) यमः <u>प्राणान्</u> हरति।

(iii) <u>सत्येन</u> रविः तपते।

(iv) <u>संस्कृतभाषा</u> अतीव वैज्ञानिकी।

प्र6. अधोलिखितवाक्यानि घटनाक्रमानुसारेण पुनः लिखत - (½x8=4)

(i) हंसौ अवदताम् - "प्रातः यद् उचितं तत्कर्त्तव्यम्।"

(ii) तत्र संकटविकटनामकौ हंसौ निवसतः।

(iii) काष्ठदण्डे लम्बमानं कूर्मं दृष्ट्वा गोपालकाः पश्चाद् अधावन्।

(iv) केचित् धीवराः सरस्तीरे आगच्छन्।

(v) मगधदेशे फुल्लोत्पलनाम सरः अस्ति।

(vi) कूर्मः अवदत् - "अहं भवद्भ्यां सह आकाशमार्गेण गन्तुम् इच्छामि।"

(vii) अपरः अवदत् - अहं सरस्तीरे दग्ध्वा खादिष्यामि।

(viii) कूर्मः आकाशात् पतितः गोपालकैः मारितश्च।

प्र7. अर्थैः सह शब्दानां मेलनम् कृत्वा उत्तरपुस्तिकायां पुनः लिखत - (6x½=3)

| शब्दाः | अर्थाः |
|---|---|
| शौर्ये | तटे |
| सरः | दृष्ट्वा |
| अवलोक्य | संसारे |
| तीरे | कार्येषु |
| जगति | बले |
| कर्मसु | तडागः |